139

पंचरत्नवी

No: 196
6.8.69

पंचस्तवी ।

लघुस्तवः ।

ॐ ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां ।
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ॥
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता ।
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥ १ ॥
यां मात्रा त्रपुसीलतातनुलसत्तन्तूत्थितिस्पर्धिनी ।
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ॥
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमा ।
ज्ञात्वेत्थं न पुनः स्पृशन्ति जुनमीकर्षे । ॥ २ ॥
संकर्षणि त्वमनुसृत्य यदा बिभर्षि ॥

---

१ निरवधि यत् शोभनोक्तिरचनारूपममृतं तस्य निर्झरः प्रवाहः प्रसरो अखिल[illegible]
स्य तस्य । २ प्रसादगुणललिताः । ३ रञ्जिताम् । ४ लज्जाम् । ५ सौभाग्यमु[illegible]
नारायणः । ७ शिवस्य । ८ अंगीकुर्वन्ति । ९ सदृशम् । १० हे कालाग्नि[illegible]

दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं ।
येनाकूतवशादपीह वरदे बिन्दुं विनाप्यक्षरम् ॥
तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे ।
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्राम्बुजात् ॥ ३ ॥
यन्नित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलं ।
तत्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ॥
आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो द्विजाः ।
प्रारम्भे प्रणवास्पदप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥ ४ ॥
यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै- ।
स्तत्तार्तीयिकमहं नमामि मनसा त्वद्बीजमिन्दुप्रभम् ॥
द्यौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये ।
[illegible] गिरि वर्तते स नियतं योगं विना सिद्धिदः ॥ ५ ॥
[illegible] तव देवि बीजमनघं सव्यञ्जनाव्यञ्जनं ।
[illegible] स्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् ॥

[illegible] । ३ सारोद्धारः अमृतमाधुर्य-

निस्सीमसूक्तिरचनामृतनिर्झरस्य ।
तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥ ११ ॥
सिन्दूरपांसुपटलच्छुरितामिव द्यां ।
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ॥
यः पश्यति क्षणमपि त्रिपुरे विहाय ।
व्रीडां मृडानि ! सुदृशस्तमनुद्रवन्ति ॥ १२ ॥
मातर्मुहूर्तमपि यः स्मरति स्वरूपं ।
लाक्षारसप्रसरतन्तुनिभं भवत्याः ॥
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः ।
प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥ १३ ॥
योऽयं चकास्ति गगनार्णवरत्नमिन्दु- ।
र्योऽयं सुरासुरगुरुः पुरुषः पुराणः ॥
यद्वाममर्धमिदमन्धकसूदनस्य ।
देवि ! त्वमेव तदिति प्रतिपादयन्ति ॥ १४ ॥
इच्छानुरूपमनुरूपगुणप्रकर्षं ।
संकर्षणि त्वमनुसृत्य यदा बिभर्षि ॥

---

१ निरवधि यत् शोभनोक्तिरचनारूपममृतं तस्य निर्झरः प्रवाहः प्रसरो अखिल[illegible]
स्य तस्य । २ प्रसादगुणललिताः । ३ रञ्जिताम् । ४ लज्जाम् । ५ सौभाग्यगु[illegible]
[illegible] नारायणः । ७ शिवस्य । ८ अंगीकुर्वन्ति । ९ सदृशम् । १० हे कालाग्नि[illegible]

जायेत स त्रिभुवनैकगुरुस्तदानीं ।
देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥ १५ ॥
रुद्राणि विद्रुममयीं प्रतिमामिव त्वां ।
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ॥
तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते ।
कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥ १६ ॥
त्वद्रूपमुल्लसितदाडिमपुष्परक्त- ।
मुद्भावयेन्मदनदेवतमक्षरं यः ॥
तं रूपहीनमपि मन्मथनिर्विशेष- ।
मालोकयन्त्युरुनितम्बभरास्तरुण्यः ॥ १७ ॥
ध्यातासि हैमवति येन हिमांशुरश्मि- ।
मालाऽमलद्युतिरकल्मषमानसेन ॥
तस्याऽविलम्बमनवद्यमनन्तकल्प- ।
मल्पैर्दिनैः सृजसि सुन्दरि वाग्विलासम् ॥ १८ ॥
आधारमारुतनिरोधवशेन येषां ।
सिन्दूररञ्जितसरोजगुणानुकारि ॥

नाटकाचार्यः । २ हे रुद्रशक्ते । ३ हठात् । ४ कंठे आलिङ्गनार्थं स्थापिताः । ५ भासितम् । ६ ध्यायेत् । ७ कामसदृशमित्यर्थः । ८ पार्वति । ९ शुक्लरूपा । १० प्रशान्तःकरणेन । ११ निर्दोषम् । १२ प्रभूततरम् । १३ वाङ्माधुर्यम् । १४ मूलाधारशक्तिनिरोधतः । १५ पद्मतंतुसदृशम् ।

तीव्रं हृदि स्फुरति देवि ! वपुस्त्वदीयं ।
ध्यायन्ति तानिह समीहितसिद्धसाध्याः ॥ १९ ॥
त्वामैन्दवीमिव कलामनुभालदेश- ।
मुद्भासिताम्बरतलामवलोकयन्तः ॥
सद्यो भवानि ! सुधियः कवयो भवन्ति ।
त्वं भावनाहितधियां कुलकामधेनुः ॥ २० ॥
त्वां व्यापिनीति सुमना इति कुण्डलीति ।
त्वां कामिनीति कमलेति कलावतीति ॥
त्वां मालिनीति ललितेत्यपराजितेति ।
देवि ! स्तुवन्ति विजयेति जयेत्युमेति ॥ २१ ॥
ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति ।
रूपं तवाम्ब ! नवयावकपंकपिंगम् ॥
तेषां सदैव कुसुमायुधबाणभिन्न- ।
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥ २२ ॥
उत्तप्तहेमरुचिरे त्रिपुरे ! पुनीहि ।
चेतश्चिरन्तनमघौघवनं लुनीहि ॥

१ सिद्धाभिलाषिताः साध्याख्या देवाः । २ चान्द्रीम् । ३ ध्यानस्थितबुद्धा । ४ सर्वप्रदेत्यर्थः । ५ लाक्षारसः ।

कारागृहे निगडबन्धनपीडितस्य ।
त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्ति ॥ २३ ॥

शर्वाणि ! सर्वजनवन्दितपादपद्मे ! ।
पद्मच्छदच्छविविडम्बितनेत्रलक्ष्मि ! ॥
निष्पापमूर्तिजनमानसराजहंसि ! ।
हंसि त्वमापदमनेकविधां जनस्य ॥ २४ ॥

त्वत्पादपंकजरजःप्रणिपातपूतैः ।
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ॥
क्षीरक्षपाकरदुकूलहिमावदाता ।
कैरप्यवापि भुवनत्रितयेऽपि कीर्तिः ॥ २५ ॥

त्वद्रूपैकनिरूपणप्रणयिनावन्धोदहोस्त्वद्भु ग- ।
र्भामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ॥
त्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे ।
त्रापि त्वदुपासनव्यसनिता मे देवि ! मा शाम्यतु ॥ २६ ॥

शृंखला । २ पद्मपत्रशोभयाऽनुकृतनेत्रकान्ते । ३ मनः सरश्च । ४ अपाकरोषि ।
कुवर्णा । ६ अनिर्वचनीयमहिमशालिभिः । ७ प्राप्ता । ८ निश्चयकरणे सस्नेहता ।
मूहः । १० चातुर्यम् । ११ तत्परता राग इत्यर्थः ।

उद्दामकामपरमार्थसरोजषण्ड-[1] ।
चण्डद्युतिद्युतिमुपासितषट्प्रकाराम्[2] ॥
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-[3] ।
लीलागुहां भगवतीं त्रिपुरां नमामि ॥ २७ ॥
गणेशबटुकस्तुता रतिसहायकामान्विता[4] ।
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता[5] ॥
अनंगकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः[6] ।
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥ २८ ॥
यः स्तोत्रमेतदनुवासरमीश्वरायाः[7] ।
श्रेयस्करं पठति वा यदि वा शृणोति ॥
तस्येप्सितं फलति राजभिरीड्यतेऽसौ[8] ।
जायेत न प्रियतमो हरिणेक्षणानाम्[9] ॥ २९ ॥
ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-[10] ।
स्कन्दद्विपाननहुताशनवन्दितायै ॥

---

१ अत्यन्ताभिलषणीयपरमार्थभूतमूलाधारादिषट्चक्रकमलवृन्दविकासे सूर्यदीप्ति। २ अङ्गीकृतषट्चक्रादिविशेषाम्। षट्चक्रप्रकारत उपासितां वा। ३ विनाशः। ४ ज्ञा। ५ क्रीडावासस्थितिम्। ६ मायया बटुभूतो वामनावतारः को ब्रह्मा। ७ रतिप्री। दिभिः स्वशक्तिभिः सहितैरेकोनपंचाशन्मिथुनरूपकामकामदादिभिरन्विता। ८ भिर्गुरुतरयोगिनीभिः। ९ दिव्यौघसिद्धौघमानवौघरूपैः। १० प्रतिदिनम्।

पञ्चस्तव्यां चर्चास्तवः ।

वागीश्वरि ! त्रिभुवनेश्वरि ! विश्वमात-
रन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥ ३० ॥

इति श्रीपञ्चस्तव्यां चर्चास्तवो द्वितीयः ॥

घटस्तवः ।

देवि ! त्र्यम्बकपत्नि ! पार्वति ! सति ! त्रैलोक्यमातः ! शिवे ! ।
शर्वाणि ! त्रिपुरे ! मृडानि ! वरदे ! रुद्राणि ! कात्यायनि ! ॥
भीमे ! भैरवि ! चण्डि ! शर्वरि ! कले ! कालक्षये ! शूलिनि ! ।
त्वत्पादप्रणताननन्यमनसः पर्याकुलान्पाहि नः ॥ १ ॥

उन्मत्ता इव सस्पृहा इव विषव्यासक्तमूर्च्छा इव ।
प्राप्तप्रौढमदा इवातिविरहग्रस्ता इवार्ता इव ॥
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एकाग्रत- ।
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति वामभ्रुवः ॥ २ ॥

देवि ! त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम- ।
त्याजन्म स्फुरदंघ्रिपीठविलुठत्कोटीरकोटिच्छटाः ॥
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते ।
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥ ३ ॥

ध्यायन्ति ये क्षणमपि त्रिपुरे ! हृदि त्वां ।
लावण्ययौवनधनैरपि विप्रयुक्ताः ॥

---

१ त्वदेकाग्रमनसः । २ भूताद्याविष्टा इव । ३ उत्पन्नमोहाः । ४ एकवारमेव । ५ न
नः । ६ लग्नमुकुटाग्रप्रान्ताः । ७ कामपीडाविह्वलाः । ८ सुन्दर्यः । ९ विरहित

ते विस्फुरन्ति ललितायतलोचनानां ।
चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥ ४ ॥
एतं किं तु दृशा पिबाम्युत विशाम्यस्याङ्गमंगैर्निजैः ।
किं वाऽमुं निगलाम्यनेन सहसा किं वैकतामाश्रये ॥
तस्येत्थं विवशो विकल्पघटनाकूतेन योषिज्जनः ।
किं तद्यन्न करोति देवि ! हृदये यस्य त्वमावर्तसे ॥ ५ ॥
विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः ।
शब्दः शक्तिरिति त्रिलोकजननि ! त्वय्येव तथ्यस्थितिः ॥
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं ।
त्वद्भक्तानपि न क्षिणोषि च रुषा तद्देवि ! चित्रं महत् ॥ ६ ॥
इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं ।
पाण्डुत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ॥
वर्षन्तीममृतं भवानि ! भवतीं ध्यायन्ति ये देहिन- ।
ो निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥ ७ ॥
र्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव ।
राब्धेः लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ॥

१ रमन्त इत्यर्थः । २ चित्तरूपे चित्राश्रये लिखितमूर्तयः । अनुक्षणं विलासिन्यो-
र्याता इत्यर्थः। ३ पराधीनः।४ कथं कथं तेन सह रमे इति संकल्पविशेषाभिप्रायेण ।
नः पुनः स्फुरसि । ६ सत्यप्रतिष्ठः । ७ ता रुजः। ८ सतैलः । ९ अमृतप्रवाहैः ।

प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया ।
चित्तान्तर्निहतार्तितापविपदस्ते सम्पदं बिभ्रति ॥ ८ ॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं[1] ।
त्वां ग्रन्थिपञ्चकमिदं[2] तरुणार्कशोणाम् ॥
रागार्णवे बहलरागिणि मज्जयन्तीं[3] ।
कृत्स्नं जगद्धर्षति[4] चेतसि तान्मृगाक्ष्यः ॥ ९ ॥

लाक्षारसस्नपितपंकजतंतुतन्वी- ।
मन्तः स्मरत्यनुदिनं भवतीं भवानि ! ॥
यस्तं स्मरप्रतिममप्रतिमस्वरूपा[5] ।
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥ १० ॥

स्तुमस्त्वां वाचमव्यक्तां[6] हिमकुन्देन्दुरोचिषम् ॥
कदम्बमालां बिभ्राणामापादतललम्बिनीम् ॥ ११ ॥

मूर्ध्नीन्दोः सितपंकजासनगतां प्रालेयपाण्डुत्विषं ।
वर्षन्तीममृतं सरोरुहभुवो वक्त्रेऽपि रंध्रेऽपि[7] च[8] ॥

---

१ मूलाधारादुद्यन्तीम् । २ स्वाधिष्ठानादिचक्रपंचकम् । अविद्यास्मितारागद्वेषाभिनिवेशाख्यं क्लेशपंचकं वा । ३ तन्मयीकुर्वन्तीम् । ४ धारयन्ति । ५ अत्युत्तमस्वरूपा । ६ परारूपाम् । ७ मूलाधारेऽपि । ८ ब्रह्मरन्ध्रेऽपि ।

अच्छिन्ना[5] च मनोहरा[2] च ललिता[3] चातिप्रसन्नापि[4] च ।
त्वामेव स्मरतां स्मरारिदयिते ! वाक्सर्वतो वल्गति[6] ॥ १२ ॥
ददातीष्टान्भोगान् क्षपयति रिपून् हन्ति विपदो ।
दहत्यार्धीन्व्याधीन्[7] शमयति सुखानि प्रतनुते ॥
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं ।
सकृद् ध्याता देवी किमिव निरवद्यं न कुरुते ॥ १३ ॥
यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय- ।
त्यन्वेति[8] प्रतिपद्यते[9] कलयति स्तौत्याश्रयत्यर्चति[10] ॥
यश्च त्र्यम्बकवल्लभे ! तव गुणानाकर्णयत्यादरा- ।
त्तस्य श्रीर्न गृहादपैति[11] विजयस्तस्याग्रतो धावति[12] ॥ १४ ॥
किं किं दुःखं दनुजदलिनि ! क्षीयते न स्मृतायां ।
का का कीर्तिः कुलकमलिनि ख्याप्यते[13] न स्तुतायाम् ॥
का सिद्धिः सुरवरनुते प्राप्यते नार्चितायां ।
कं योगं त्वयि न चिनुते[14] चित्तमालम्बितायाम्[15] ॥ १५ ॥

---

१ ध्वनिगर्भत्वेनानर्गला । २ निर्दोषत्वेन । ३ सालंकारत्वेन । ४ प्रसादादिगुणयुक्तत्व । ५ अनवच्छिन्नत्वेन प्रसरति । ६ मानसौर्व्यथाः । ७ सेवकवदनुगच्छति । ८ तात्रियमानङ्गीकरोति । ९ विचारयति । १० शरण्यत्वेन । ११ अपगच्छति । १२ चक्रपाणिनि । १३ विश्रूयते । १४ अधिगच्छति । १५ प्रापितायाम् ।

ये देवि ! दुर्धरकृतान्तमुखान्तरस्था ।
ये कालि ! कालघनपाशनितान्तबद्धाः ॥
ये चण्डि ! चण्डगुरुकल्मषसिन्धुमग्ना- ।
स्तान्पासि मोचयसि तारयसि स्मृतैव ॥ १६ ॥
लक्ष्मीवशीकरणचूर्णसहोदराणि ।
त्वत्पादपंकजरजांसि चिरं जयन्ति ॥
यानि प्रणाममिलितानि नृणां ललाटे ।
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥ १७ ॥
रे मूढाः किमयं वृथैव तपसा देहः परिक्लिश्यते ।
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियंते गृहाः ॥
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यता- ।
मुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥ १८ ॥
याचे न कंचन न कंचन वञ्चयामि ।
सेवे न कंचन निरस्तसमस्तदैन्यः ॥
श्लक्ष्णं वंसे मधुरमभि भजे वरस्त्रीं ।
देवी हृदि स्फुरति मे कुलकामधेनुः ॥ १९ ॥

१ दुःसहः । २ दुर्धर्षदुरन्तपापसागरबुडिताः । ३ सदृशानि । ४ परिमार्जयन्ति । ५ दौर्भाग्यसूचकानि अक्षराणि । ६ नीचसंबोधनम् । ७ शून्यीक्रियन्ते । ८ उत्फुल्ल । ९ कोमलम् । १० परिदधामि । ११ सुरभिवदखिलकामदा ।

शब्दब्रह्ममयि स्वच्छे देवि त्रिपुरसुन्दरि ॥
यथाशक्ति जपं पूजां गृहाण परमेश्वरि ॥ २० ॥
नन्दंतु साधकाः सर्वे विनश्यन्तु विद्वेषकाः ॥
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥ २१ ॥
दर्शनात्पापशमनी जपान्मृत्युविनाशिनी ॥
पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ॥ २२ ॥
नमामि यामिनीनाथलेखालंकृतकुन्तलाम् ॥
भवानीं भवसंतापनिर्वापणसुधानदीम् ॥ २३ ॥
मंत्रहीनं क्रियाहीनं विधिहीनं च यद्धृतम् ॥
त्वया तत्क्षम्यतां देवि कृपया परमेश्वरि ॥ २४ ॥
इति श्रीपञ्चस्तव्यां घटस्तवस्तृतीयः समाप्तः ।

१ अनाहतध्वनिमयि । २ निन्दकाः । ३ चन्द्रलेखाशोभितालकाम् । ४ संसारसं-तप्तान्तौ अमृतनदीम् ।

अम्बास्तवः ।

ॐ यामामनन्ति मुनयः प्रकृतिं[1] पुराणीं[2] ।
विद्येति यां श्रुतिरहस्यविदो वदन्ति ॥
तामर्धपल्लवितशंकररूपमुद्रां[3] ।
देवीमनन्यशरणः शरणं प्रपद्ये[4] ॥ १ ॥
अम्ब स्तवेषु तव तावदकर्तृकाणि[5] ।
कुण्ठीभवन्ति वचसामपि गुम्फनानि[6] ॥
डिम्भस्य मे स्तुतिरसावसमञ्जसापि[7] ।
वात्सल्यनिर्भरहृदयां भवतीं[8] धिनोति[9] ॥ २ ॥
व्योमेति बिन्दुरिति नादः[10] इतीन्दुलेखा[11] ।
रूपेति वाग्भवतनूरिति मातृकेति[12] ॥
निःष्यन्दमानसुखबोधसुधास्वरूपा[13] ।
विद्योतसे मनसि भाग्यवतां जनानाम् ॥ ३ ॥

---

१ प्रतिपादयन्ति । २ जगद्योनिं । ३ अर्धं प्रकटिता शंकररूपस्याकृतिर्यया । ४ व्रजामि । ५ साकल्येन । ६ रचनाविशेषाः । ७ बालस्य । ८ अनुचितापि । ९ अधीनम् । १० प्रीणयति । ११ ज्ञानं । १२ विमर्शः । १३ वाग्बीजरूपा । १४ अकारादिक्षकारांता । १५ स्ववदानन्दज्ञानामृतरूपा ।

* शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका इति वचनान्नास्ति कर्तारो येषां तानि वैदिकानि इत्यर्थः ।

आविर्भवत्पुलकसंततिभिः शरीरै- ।
[2]र्निष्यन्दमानसलिलैर्नयनैश्च नित्यम् ॥
वाग्भिश्च गद्गदपदाभिरुपासते ये ।
पादौ तवाम्ब भुवनेषु त एव धन्याः ॥ ४ ॥
वक्त्रं यदु[3]द्यतमभिष्टुतये भवत्या- ।
स्तुभ्यं नमो यदपि देवि शिरः करोति ॥
चेतश्च यत्त्वयि परायणमम्ब तानि ।
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥ ५ ॥
मूलालँवालकुहरादुदिता भवानि ।
निर्भिद्य षट्सरसिजानि तडिल्लतेव ॥
भूँयोऽपि तत्र विशसि ध्रुवमंडलेन्दु- ।
निःष्यन्दमानपरमामृततोयरूपा ॥ ६ ॥
दग्धं यदा मदनमेकमनेकधा ते ।
मुँग्धः कटाक्षविधिरङ्कुरयाँचकार ॥
धत्ते तदाप्रभृति देवि ललाटनेत्रं ।
सत्यं ह्रियेव मुकुलीकृतमिन्दुमौलिः ॥ ७ ॥

१ रोमाञ्चः । २ उपलक्षिता । ३ उद्यमयुक्तम् । उपरिकृतमित्यर्थः । ४ मूलाधार- । ५ अवरोहे । ६ अक्षीणमंडलब्रह्मरंध्रवर्तिन इन्दोः सकाशात् । ७ सुन्दरः । नयामास । ९ निमीलितम् ।

अज्ञातसंभवमनाकलितान्वयायं[1] ।
भिक्षुं कपालिनमवाससमद्वितीयम् ॥
पूर्वं करग्रहणमङ्गलतो भवत्याः[2] ।
शम्भुं क एव बुबुधे गिरिराजकन्ये ! ॥ ८ ॥
चर्माम्बरं च शवभस्मविलेपनं च ।
भिक्षाटनं च नटनं च परेतभूमौ[3] ॥
वेतालसंहतिपरिग्रहता[4] च शम्भोः ।
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥ ९ ॥
कल्पोपसंहरणकेलिषु[5] पण्डितानि ।
चण्डानि खण्डपरशोरपि ताण्डवानि ॥
आलोकनेन तव कोमलितानि मात- ।
र्लास्यात्मना परिणमन्ति[6] जगद्विभूत्यै ॥ १० ॥
जन्तोरपश्चिमतनोः[7] सति कर्मसाम्ये ।
निश्शेषपाशपटलच्छिदुरा[8] निमेषात् ॥
कल्याणि ! दैशिककटाक्षसमाश्रयेण[9] ।
कारुण्यतो भवसि शाम्भववेददीक्षा ॥ ११ ॥

१ अज्ञातकुलम् । २ विवाहात् । ३ श्मशाने । ४ परिवारस्त्वम् । ५ कल्पान्तक्रीडासु । ६ कल्पान्तरमापादयंति । ७ अग्रे जन्माभाववतः । ८ कलादिपाशसमूहच्छेत्री । ९ गुरुवः

मुक्ताविभूषणवती नवविद्रुमाभा ।
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ॥
एकः स एव भुवनत्रयसुन्दरीणां ।
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥ १२ ॥
ये भावयन्त्यमृतवाहिभिरंशुजालै-[1] ।
राप्यायमानभुवनाममृतेश्वरीं त्वाम् ॥
ते लङ्घयन्ति ननु मातरलङ्घनीयां[2] ।
ब्रह्मादिभिः सुरवरैरपि कालकक्षाम्[3] ॥ १३ ॥
यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां ।
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ॥
पद्मासनां च हृदये भवतीमुपास्ते ।
मातः स विश्वकवितार्किकचक्रवर्ती ॥ १४ ॥
बर्हावतंसयुतबर्बरकेशपाशां[4] ।
गुञ्जावलीकृतघनस्तनहारशोभाम्[5] ॥
श्यामां प्रवालवदनां सुकुमारहस्तां[6] ।
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥ १५ ॥

---

१ करणमंडलानिःसृतैश्चिन्मरीचिभिः । २ मर्यादाम् । अकालकलिता भवन्ती- । ३ मयूरपिच्छम् । ४ अरण्यजैः फलविशेषैः । ५ विद्रुमवत् । ६ कोमलकराम् ।

अर्धेन किं नवलतालोलितेन मुग्धे ।
क्रीतं विभोः परुषमर्धमिदं त्वयेति ॥
आलीजनस्य परिहासवचांसि मन्ये ।
मन्दस्मितेन तव देवि जडीभवन्ति ॥ १६ ॥
ब्रह्माण्डबुद्बुदकदम्बकसंकुलोऽयं ।
मायोदधिर्विविधदुःखतरङ्गमालः ॥
आश्चर्यमम्ब झटिति प्रलयं प्रयाति ।
त्वद्ध्यानसंततिमहावडवामुखाभौ ॥ १७ ॥
दाक्षायणीति कुटिलेति गुहारणीति ।
कात्यायनीति कमलेति कलावतीति ॥
एका सती भगवती परमार्थतोऽपि ।
संदृश्यसे बहुविधा ननु नर्तकीव ॥ १८ ॥
आनन्दलक्षणमनार्हतनाम्नि देशे ।
नादात्मना परिणतं तव रूपमीशे ॥
प्रत्यङ्मुखेन मनसा परिचीयमानं ।
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥ १९ ॥

१ कोमलेन । २ कठिनम् । ३ सखी । ४ जलबिन्दुविकाराः । ५ पूर्णः । ६ कुण्डलिनीरूपतया । ७ चिद्दीप्तिसंदीपिनीत्वात् । ८ हृच्चक्रे । ९ शब्दरूपेण न १० अंतर्मुखेन । ११ अभ्यस्यमानम् ।

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं ।
त्वं चेतनासि पुरुषे पवने बलं त्वम् ॥
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा ।
निःसारमेतदखिलं त्वंहते यदि स्यात् ॥ २० ॥
ज्योतींषि[2] यद्दिवि चरन्ति यदन्तरिक्षं ।
सूते पयांसि यदहिर्धरणीं च धत्ते ॥
यद्वाति वायुरनलो यदुदर्चिरास्ते ।
तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ २१ ॥
सङ्कोचमिच्छसि यदा गिरिजे तदानीं ।
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा[3] ॥
यद्वा विकासमुपयासि यदा तदानीं ।
त्वन्नामरूपगणनाः सुकरीभवन्ति ॥ २२ ॥
भोगाय देवि भवतीं कृतिनः प्रणम्य ।
भ्रूकिंकरीकृतसरोजगृहासहस्राः[4] ॥
चिन्तामणिप्रचयकल्पितकेलिशैले ।
कल्पद्रुमोपवन एव चिरं रमन्ते ॥ २३ ॥

---

१ त्वां विना । २ ताराः । ३ वाङ्मनोगोचरातीतेत्यर्थः । ४ राशिः ।
* भ्रुवोः किंकरीकृतं भ्रूविक्षेपमात्रेणैव प्रणिहितं लक्ष्मीसहस्रं यैस्ते ।

हन्तुं त्वमेव भवसि त्वदधीनमीशे ।
संसारतापमखिलं दयया पशूनाम् ॥
वैकर्त्तनी किरणसंहतिरेव शक्ता ।
घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥ २४ ॥
शक्तिः शरीरमधिदैवतमन्तरात्मा ।
ज्ञानं क्रियाः करणमासनजालमिच्छा ॥
ऐश्वर्यमायतनमावरणानि च त्वं ।
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥ २५ ॥
भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा ।
विह्वानले मरुति शान्तिरतीतशान्तिः ॥
व्योम्नीति याः किल कलाः कलयन्ति विश्वं ।
तासां विदूरतरमम्ब पदं त्वदीयम् ॥ २६ ॥
यावत्पदं पदसरोजयुगं त्वदीयं ।
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ॥

---

१ पश्यन्ति सामान्यवत्पशवो जीवाः । २ सावित्री । आदित्याज्जायते वृष्टिरित्युक्तेः । यद्वा चिद्रूपा शक्तिः । ४ जीवात्मा । ५ ज्ञानात्मकं मनः । ६ क्रियात्मकः प्राणः । कला नाम जगत्कर्तृस्वरूपा शक्तिर्बाहिर्मुखत्वमापन्ना अत्र तु भूम्यादिपदैर्मूलाधारा न्याणि लक्ष्यन्ते । ८ चैतन्यस्वरूपम् । ९ स्थानम् ।

तावद्विकल्पजटिलाः[1] कुटिलप्रकारा- ।
स्तर्कग्रहाः समयिनां[2] प्रलयं न यान्ति ॥ २७ ॥
यद्देवयान[3]पितृयानविहारमेकं[4] ।
कृत्वा मनः करण[5]मंडलसार्वभौमम् ॥
यान[6] निवेश्य तव कारण[7]पंचकस्य ।
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २८ ॥
स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः[8] ।
कस्याश्चनापि तव वैभवमम्ब यस्याः ॥
पत्यौ गिरामपि न शक्यत एव वक्तुं ।
सासि स्तुता किल मयेति तितिक्षितव्य[9]म्॥ २९ ॥
कालाग्निकोटिरुचिमम्ब षडध्व[10]शुद्धा- ।
वाप्लावनेषु भवतीममृतौघवृष्टिम् ॥
श्यामां घनस्तनतटां संकलीकृतौ[11] च ।
ध्यायन्त एव जगतां गुरवो भवन्ति ॥ ३० ॥

---

१ दुर्बोधाः । २ मतवादिनाम् । ३ प्राणापानाभ्यामिडापिंगलयोः संचारं कृत्वा । ४ मुख्या योगिनः । ५ इन्द्रियसमूहचक्रवर्तिनम् । ६ शक्तिमार्गे । ७ शक्तेः पंचकार-प्रासनत्वाच्छक्तिस्वरूपा भवन्तीत्यर्थः । ८ शिरांसि । ९ मध्यात् । १० ब्रह्मणापि । ११ क्षन्तव्यम् । १२ वर्णपदमंत्रतत्त्वभुवनकलाख्यषडध्वरूपदेहशोधने । १३ विद्वसा- तत्त्वेन देहोत्पादने ।

विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ॥
त्वां विश्वमाहुरपरे वयमामनाम ।
साक्षादपारकरुणां गुरुमूर्तिमेव ॥ ३१ ॥
कुवलयदलनीलं बर्बरस्निग्धकेशं ।
पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ॥
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः ।
सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥ ३२ ॥
इति श्रीपञ्चस्तव्यां चतुर्थोऽम्बास्तवः समाप्तः ।

---

१ शून्यम् । २ बौद्धाः । ३ वेदान्तिनः । ४ नैयायिकाः । ५ भेदप्रथाम् । ६ चार्वाकाः ७ शाक्ताः । ८ मध्यम् । ९ संनिहितं भवतात् ।

सकलजननीस्तवः ।

ॐ अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-[1]
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः[2] ॥
जगन्मातर्जन्मज्वरभयतमःकौमुदि[3] वयं ।
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १ ॥
वपुस्तर्कागम्यस्वरसपरमानन्दविभव-[4] ।
प्रबोधाकाराय द्युतितुलितनीलोत्पलरुचे ॥
शिवस्याराध्याय स्तनभरविनम्राय सततं ।
नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥ २ ॥
लुठद्बुआहारस्तनभरनमन्मध्यलतिका-[5] ।
मुदञ्चद्धर्माम्भःकणगुणितनीलोत्पलरुचम् ॥
शिवं पार्थत्राणप्रवणमृगयाकारगुणितं[6] ।
शिवामन्वग्यान्तीं शबरमहमन्वेमि शबरीम्[7] ॥ ३ ॥
मिथः केशाकेशिप्रधननिधनास्तर्कघटना-[8] ।
बहुश्रद्धाभक्तिप्रणयविषयाश्चात्मविधयः ॥

---

१ त्वत्स्वरूपमिति शेषः । २ परिवर्तमानाः । ३ मतभेदवादिनः । ४ संबोधनम् । सूक्ष्मरूपेण । ६ स्थूलरूपेण । ७ मनोज्ञाय । ८ अवलम्बलताम् । ९ निःसरत् । १० उपशोभितम् । ११ अर्जुनरक्षातत्परेण मृगयाकारोचितेन वेषेण कृतशोभम् । १२ शरणं प्रपद्ये । १३ केशेषु केशेषु गृहीत्वा यद्युद्धं प्रवृत्तम् । १४ प्राप्तिः ।

प्रसीद प्रत्यक्षीभव गिरिसुते ! देहि शरणं ।
निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥ ४ ॥
शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं ।
कदा केन केति क्वचिदपि न कश्चित्कलयति ॥
अमुष्मिन्विश्वासं विजहिहि ममाह्लाय वपुषि ।
प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥ ५ ॥
अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी ।
शिवस्यासीर्यस्त्वं परिणयविधौ देवि ! गृहिणी ॥
संवित्री भूतानामपि यदुदभूः शैलतनया ।
तदेतत्संसारप्रणयनमहानाटकसुखम् ॥ ६ ॥
ब्रुवन्त्येके तत्त्वं भगवति ! सदन्ये विदुरसत् ।
परे मातः ! प्राहुस्तव सदसदन्ये सुकवयः ॥
परे नैतत्सर्वं समभिदधते देवि ! सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ! ॥ ७ ॥

---

१ निराश्रयम् । २ परिवर्तते । ३ चंचलम् । ४ पंक्तेः । ५ गणयति । ६ त्यज । ७ मदीयमिदं वपुरिति विश्वासम् । ८ द्रुतम् । ९ उत्पादयित्री । १० उत्पन्ना । ११ संपादनं । १२ सांख्याः । १३ बौद्धाः । १४ तार्किकाः । १५ वेदान्तिनः । न सत्तन्नासदुच्यते इति श्रुतेः ।

तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं ।
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ॥
किमप्यष्टात्रिंशत्करणसकलीभूतमनिशं ।
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥ ८ ॥

चतुष्पत्रान्तः षड्दलभगपुटान्तस्त्रिवलय-।
स्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतियुते ! ॥
षडश्रं भित्त्वादौ दशदलमथ द्वादशदलं ।
कलाश्रं च द्व्यश्रं गतवति ! नमस्ते गिरिसुते ॥ ९ ॥

कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः ।
परे तत्सम्भेदं समभिदधते कौलमपरे ॥
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे ।
महामाये ! तत्त्वं तव कथममी निश्चिनुमहे ॥ १० ॥

---

१ षट्चक्राण्येव वनम् । २ मूलाधारम् । ३ अवरोहे । ४ द्वादशकिरणप्राणसूर्यरूपेण षोडशकिरणापानसोमरूपेण दशकिरणोदानानलरूपेण । ५ षट्कोणत्रिकोणमध्ये । ६ असंख्याः । ७ षड्दलं स्वाधिष्ठानचक्रम् । ८ मणिपूरकम् । ९ अनाहतचक्रम् । १० विशुद्धिचक्रम् । ११ आज्ञाचक्रम् । १२ ब्रह्मरंध्रं प्रातवति । १३ षट्त्रिंशत्तत्त्वात्मकम् । १४ स्वरूपम् । १५ परमशिवस्वरूपम् तयोः संयोगरूपम् । १६ शक्तिरूपम् । १७ विद्यातत्त्वादारभ्य शिवतत्त्वं तावद्व्याप्तिर्यस्याः शक्तिर्महामाया ।

षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा ।
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ॥
वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः ।
कुचाभ्यामानम्रः शिवपुरुषकारो विजयते ॥ ११ ॥
प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं ।
प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् ॥
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः ।
प्रसादात्ते जन्तुः शिवमकुलमम्ब ! प्रविशति ॥ १२ ॥
प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां ।
समुन्मीलन्मुक्ताफलबहुलनेपथ्यकुसुमाम् ॥
स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां ।
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् १३
षडाधारावर्तैरपरिमितमंत्रोर्मिपटलै- ।
श्चलन्मुद्राफेनैर्बहुविधलसद्देवतझषैः ॥

---

१ वर्णादयः । २ सदृश्या । ३ नम्रम् । ४ अहमित्येवंरूपा शक्तिः । ५ चिद्विमर्शाख्याम् । ६ ज्ञानात्पूर्वमाविदिताम् । ७ सुषुम्णामार्गम् । ८ प्राणापानाख्यम् । ९ विलापयन् । १० सर्वोत्तीर्णं ब्रह्मरन्ध्रम् । ११ चिद्विश्रान्तिवह्निना विस्मार्तिरूपं भावः । १२ तत्त्वोत्तीर्णं । १३ चिद्रूपे निलीनो भवति । १४ विलसत् । १५ मायजलभ्रमैः । १६ मत्स्यैः ।

क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदी ।
भवानि ! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥ १४ ॥

महीपाथोवह्निश्वसनवियदात्मेन्दुरविभि- ।
र्वपुर्भिर्यस्तांशैरपि तव कियान्म्ब ! महिमा ॥
अमून्यालोक्यन्ते भगवति ! न कुत्राप्यणुतरा- ।
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥ १५ ॥

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं ।
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ॥
कटाक्षश्चेदत्र क्वचन तव मातः ! करुणया ।
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥ १६ ॥

कलां प्रज्ञामाद्यां समयमनुभूतिं समरसां ।
गुरुं पारम्पर्यं विनयमुपदेशं शिवकथाम् ॥
प्रमाणं निर्वाणं परममतिभूतिं परगुहां ।
विधिं विद्यामाहुः सकलजननीमेव सुनयः ॥ १७ ॥

---

१ र्णाविमर्शामृतनदी । २ जलम् । ३ यजमानः । ४ मूर्तिभिः । ५ अंशविभाग-
र्णीरित्यर्थः । ६ परमाकाशस्वरूपायाम् । ७ क्रियाशक्तिम् । ८ ज्ञानशक्तिम् ।
९ चरम् । १० इदमहमित्येवंरूपमनुभवम् । ११ परम्परोपदेशम् । १२ मायाख्याम् ।

अलीने[1] शब्दौघे तदनु विरते बिन्दुविभवे[2] ।
ततस्तत्त्वे चाष्टध्वनिभिरनुपाधिन्युपरते[3] ॥
श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनां[4] ।
स्वसंवित्तिं[5] योगी रसयति[6] शिवाख्यां परतनुम्[7] ॥ १८ ॥

परानन्दाकारां निरवधिशिवैश्वर्यवपुषं[8] ।
निराकारज्ञानप्रकृतिमनवच्छिन्नकरुणाम् ॥
संवित्तीं[9] भूतानां निरतिशयधामास्पदपदां[10] ।
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥ १९ ॥

जगत्कायं[11] ये कृत्वा तमपि हृदये तच्च[12] पुरुषे[13] ।
पुमांसं बिन्दुस्थं[14] तमपि परनादाख्यगहने[15] ॥
तदेतज्ज्ञानाख्ये[16] तदपि परमानन्दविभवे[17] ।
महाव्योमाकारे[18] त्वदनुभवशीलो[19] विजयते ॥ २० ॥

---

१ प्रत्याहारेण निवृत्ते शब्दादिविषयौघे । २ ऐन्द्रियकज्ञानविस्तारे । ३ चिदात्मपरामर्शे । ४ अकचटतपयशाष्टकवर्गात्मकध्वनिभिः । ५ अन्यवशिष्टचिन्मात्रदुरवगाहां । ६ चमत्करोति । ७ उत्कृष्टं स्वरूपम् । ८ योनिम् । ९ उत्पादयित्रीम् । १० परमशिवस्वरूपाम् । ११ भावनया ध्यात्वा । १२ कायम् । देहसारत्वात् । १३ तच्च हृदयम् । तदाश्रयत्वात् । १४ ज्ञानाश्रयम् । १५ तं बिन्दुमपि चिद्रूपे महाशून्ये । १६ शून्यं स्वात्मपरामर्शरूपे । १७ ज्ञानं स्वात्मप्रकाशानन्दमये । १८ हे महाशून्यरूपे । १९ योगी ।

विधे विद्ये वेद्ये विविधसमये वेदजननि ।
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके ॥
शिवाज्ञे शीलस्थे शिवपदवदान्ये शिवनिधे ।
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥ २१ ॥
विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले ।
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ॥
अलंचक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः ।
शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥ २२ ॥
विरिञ्चयाख्या मातः ! सृजसि हरिसंज्ञा त्वमवसि ।
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् ॥
भवन्ती सादाख्या शिवयसि च पाशौघदलिनी ।
त्वमेवैकानेका भवसि कृतभेदैर्गिरिसुते ॥ २३ ॥
मुनीनां चेतोभिः प्रमृदितकषायैरपि मनाग् ।
अशक्ये संस्प्रष्टुं चकितचकितैरम्ब सततम् ॥

---

१ नानासिद्धान्तभूते । २ चतुर्वेदसारभूते । ३ दात्रि । ४ ब्रह्मणः शिरः । ५ कपालस्वरूपम् । ६ सामर्थ्यरूपायाः । ७ ईश्वरस्वरूपम् । ८ सदाशिवरूपा शिवात्मकतां सम्पादयसि । ९ कलादिपाशसमूहं खण्डयित्री । १० नाशितरागद्वेषमोहैः । ११ अतिभीतैः ।

श्रुतीनां[1] मूर्धानः प्रकृतिकठिनाः[2] कोमलतरे ।
कथं ते विन्दन्ते पदकिसलये पार्वति पदम् ॥ २४ ॥
तडिद्वल्लीं नित्याममृतसरितं पार[3]रहितां ।
मलोत्तीर्णां[4] ज्योत्स्नां प्रकृतिमगुणग्रन्थि[5]गहनाम् ॥
गिरां दूरां विद्यामविनतकुचां[6] विश्वजननी- ।
मपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ॥ २५ ॥
शरीरं क्षित्यम्भः[7]प्रभृतिरचितं केवलमिदं ।
सुखं दुःखं चायं कलयति पुमांश्चेतन[8] इति ॥
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं[9] ।
शरीराहंकारं तव समयबाह्यो गिरिसुते ॥ २६ ॥
पिता माता भ्राता सुहृदनुचरः सद्म गृहिणी ।
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति ॥
तदा मे भिन्दाना सपदि भयमोहान्धतमसं ।
महाज्योत्स्ने[10] मातर्भव करुणया सन्निधिकरी ॥ २७ ॥

---

१ उपनिषदात्मकाः । २ स्वभावतो दुर्बोधाः । ३ मलरहिताम् । ४. मायाम् । ५ गुणाः सत्त्वादयः । ६ वृद्धामित्यर्थः । ७ जडस्वरूपमित्यर्थः । ८ अनुभवति । ९ चेतनत्वादित्यर्थः । १० देहचिदात्मनोर्भेदम् । ११ त्यक्तुम् । १२ स्वदनुग्रहबहिर्भूतः । १३ परलोकोन्मुखगमनावसरे । १४ गाढध्वान्तम् । १५ चन्द्रादिज्योतिषां प्रकाशकारिणीत्वात् महाज्योत्स्नात्वम् ।

सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः ।
सदोषं तं हित्वा तदनु गिरिराजस्य तनया ॥
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती ।
विवाहाज्जायासीत्यहह चरितं वेत्ति तव कः ॥ २८ ॥
कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः ।
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ॥
शिवादि क्षित्यन्तं त्रिवलयतनोः सर्वमुदरे ।
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥ २९ ॥
त्वया यो जानीते रचयति भवत्यैव सततं ।
त्वयैवेच्छत्यम्ब ! त्वमसि निखिला यस्य तनवः ॥
गतः साम्यं शंभुर्वहति परमं व्योम भवती ।
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥ ३० ॥

---

१ दक्षप्रजापतेः । २ समजनि । ३ सापराधम् । ४ हिमालयस्य । ५ भवसि । ६ अहहेत्याश्चर्ये । ७ लेशाः । ८ अनेन भगवत्या अतिविशालता सूचिता । ९ यस्यां सर्वं माति तस्या हृदयैकदेशे स्फुरणमहाश्चर्यकारीत्यर्थः । १० इति ज्ञानशक्तिस्त्वमेव । ११ क्रियाशक्तिरपि त्वमेव । १२ इच्छाशक्तिरपि त्वमेव । १३ शिवस्याष्टौ मूर्तयः । १४ परमं व्योम शून्यरूपत्वं गतः प्राप्तोपि साम्यं शक्तिमत्वं शंभुर्वहति तथाप्येवं शिवस्य शून्यरूपत्वं हित्वोपेक्ष्य भवती शिवस्य सम्बन्धिनी शक्तिरहमिति विहरति क्रीडति इति यदभावस्य भावत्वसम्पादनं तदतीवाश्चर्यम् ।

पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं ।
परं स्थूलं सूक्ष्मं सकुलमकुलं गुह्यमगुहम् ॥
दवीयो नेदीयः सदसदिति विश्वं भगवतीं ।
सदा पश्यन्त्याज्ञां वहसि भुवनक्षोभजननीम् ॥ ३१ ॥
मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः ।
पयोधौ कल्लोलप्रतिहितमहिम्नीव पृषतः ॥
उदेत्योदेत्याम्ब त्वयि सह निजैस्तांत्त्विककुलै- ।
र्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥ ३२ ॥
विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः ।
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ॥
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां ।
विकल्पैरेभिस्त्वामभिदधति सन्तो भगवतीम् ॥ ३३ ॥
भविश्य स्वं मार्गं सहजदयया दैशिकदृशा ।
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ॥
परानन्दाकारां सपदि शिवयन्तीमपि तनुं ।
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥ ३४ ॥

१ जगत् । २ शिवः । ३ दूरम् । ४ निकटम् । ५ साक्षात्कुर्वन्ति । ६ सूर्यः । ७ तत्त्वानां स्वस्वकार्यसमूहैः । ९ शिवादयः । १० स्वदधीनाः । ११ परमात्मा । १२ सुषुम्णामार्गम् । १४ गुरुवरानुग्रहदृष्ट्या । १५ षडध्वरूपः संसारः । १६ आनन्दयन्तीम् ।

शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी ।
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ॥
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं ।
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥ ३५ ॥
असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-[1]
द्गते जन्मन्यन्तं गुरुवपुषमासाद्य गिरिशम् ॥
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवान् ।
नयेयं[3] त्वत्पूजास्तुतिविरचनैनैव दिवसान् ॥ ३६ ॥
यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या ।
योनिस्तस्याः प्रथितमुदरे यत्तदोङ्कारपीठम् ॥
तस्मिन्नन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां ।
श्यामाकारां सकलजननीं सन्ततं भावयामि ॥ ३७ ॥
भुवि पयसि कृशानौ मारुते खे शशाङ्के ।
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ॥
वहति कुचभराभ्यां या विनम्रापि विश्वं ।
सकलजननि सा त्वं पाहि मामित्यवश्यम् ॥ ३८ ॥
इति श्रीपंचस्तव्यां सकलजननीस्तवः पंचमः ।
समाप्ता चेयं पञ्चस्तवी ।

---

१ कर्मलोपात् । २ गुरुस्वरूपम् । ३ अतिवाहयेयम् ।

श्रीविष्णुस्तुतिः ।

ॐ शंखचक्रगदापद्मधारिणे वनमालिने ॥ भक्तानां परमानन्दकारिणे विष्णवे नमः ॥ १ ॥ बर्हावतंसिने वन्यपुष्पमालाविभूषिणे ॥ नमोऽस्तु राधया सार्धं कालिन्दीकुञ्जचारिणे ॥ ॥ २ ॥ नन्दस्यानन्दकन्दाय किंकिणीमंजुलाय च ॥ यशोदापरमानन्ददायिने वंशिने नमः ॥ ३ ॥ गोपीखेलनलीलाय कृष्णाय मुक्तिदायिने ॥ नमः प्रपन्नसौभाग्यकारिणे कंसहारिणे ॥ ४ ॥ स्मृत्यैवेष्टप्रदानेन स्वस्तरोगर्वहारिणे ॥ रुक्मिणीरागिणे वृष्णिवंशोत्तंसाय ते नमः ॥ ५ ॥ लसत्कुण्डलगण्डाय श्यामसुन्दरमूर्तये ॥ मुरलीनादपीयूषगोपीहर्षकृते नमः ॥ ६ ॥ खेलायां कन्दुकेऽदृश्ये जाते राधास्तनं मुहुः ॥ यशोदां याचमानाय नमो राधाविलासिने ॥ ७ ॥ भवाब्धिमग्नपोताय भवान्धुभ्रष्टरज्जवे ॥ भवदावसुधानभ्रवृष्टये ते प्रभो नमः ॥ ८ ॥ हा नाथ हा जगन्नाथ हा कृष्णाशोकनाशन ॥ हा कुन्तीपुत्रभीतिघ्न मामुद्धर भवाब्धितः ॥ ९ ॥ मुक्त्वैकस्मात्प्रभो पाशात्पाशान्तरनियंत्रितः ॥ गाढपंक इव भ्रष्टः कदा नु मुक्तिमाप्नुयाम् ॥ १० ॥ यदाधिकायाः कुचकुंकुमार्द्रं यत्कान्दिशीकाभयदानदक्षम् ॥ यत्क्रूरकंसाय च धूमकेतुं तत्कृष्णपत्पंकजमाश्रयेऽहम् ॥ ११ ॥ पाषाणभूतां मुनियोषितं

तां यत्स्पर्शनादुद्धरति स्म सद्यः ॥ संसारमग्नोद्धरणावलम्बं तद्रामपत्पंकजमाश्रयेऽहम् ॥ १२ ॥ पंफुल्यते यच्छ्रवणेन चित्तं लोलुप्यते यन्मननेन पापम् ॥ रंरम्यते ध्यानपरश्च यत्र तद्विष्णुपत्पंकजमाश्रयेहम् ॥ १३ ॥ वर्वर्ति विश्वस्य विधौ यतः कस्तातर्ति दुष्टोऽपि यतो भवाब्धिम् ॥ पापर्ति यत्रीणि जगन्ति विष्णोर्बोभोतु भद्राय तदंघ्रिपद्मम् ॥ १४ ॥ गोवर्धने गोकुलचारणेन श्रान्तं त्वदीयं चरणारविन्दम् ॥ विश्रान्तयेऽतः क्षणमेव मे हृच्छय्यां समध्यास्व विभो कृती स्याम् ॥ १५ ॥ सामान्यतां याति निषादजातेर्विप्रोऽपि सर्वोक्तगुणो विनायाम् ॥ सा त्वत्पदाब्जानुगता प्रभो मे चिद्वृत्तिभृङ्गीसुखदाऽस्तु भक्तिः ॥ १६ ॥ सत्यं भवत्पादनिषेवणोत्थं हर्षामृतं सर्वरसोत्तमाद्यम् ॥ प्राप्तामृता अप्यमरा यदर्थं स्वामिन्सदा जायति भक्तिनम्राः ॥ १७ ॥ ध्वान्तापहाराय जनो विधत्तां वाञ्छां प्रकाशस्य विशुद्धजातेः ॥ बाह्यान्तरध्वान्तहरा हरेर्मे श्यामैव चित्तेऽस्तु हि कृष्णमूर्तिः ॥ १८ ॥ उद्धृत्य गोवर्धनपर्वतं यो गोगोपसंघं परितो ररक्ष ॥ तस्य प्रभो ! तेऽधमभक्तरक्षा दृष्टयैकसाध्या किमु हा प्रयासः ॥ १९ ॥ विश्वम्भरत्वेऽपि विभो न मे यद्वृत्तिं ददासीश्वर नात्र दूये ॥ दूये परं त्वच्छुभनामधे-

नर्थत्वयोगे महतां विनिन्द्ये ॥ २० ॥ आपन्नभीताशनिपंज-
रस्य कंसादिशत्रो ! तव पश्यतोऽपि ॥ लोभादयो मां सततं
द्विषन्ति तान्प्रत्युपेक्षा च महद्विगर्ह्या ॥ २१ ॥ दुर्भाग्यदुष्की-
र्तिकलंकहारिन्मां मन्दभाग्यं सहसा विलोक्य ॥ हा ते कथं
भव्यशिवाभिधाया जातः समासः सह नञ्पदेन ॥ २२ ॥
आदित्यचन्द्रेक्षण ! सूर्यकोटिन्यक्कारि रूपं तव दिव्यधामन् ॥
भावत्कभानेन विभाति विश्वं हार्दं तमो मे न कुतो निहंसि ॥ २३ ॥
भ्रष्टस्तमोगर्त इहाच्युताहं दष्टस्तथा कालमहाहिना च ॥ सूर्येन्दु-
वह्न्यादिविभासकस्त्वमेह्येहि संरक्ष खगेन्द्रगामिन् ॥ २४ ॥
दुर्भेद्यदुःसाध्यदुरन्तदुःखात्कूर्मस्य पाशात्त्वरया द्विपेन्द्रम् ॥
उन्मोच्य चारुन्तुदकर्मपाशैर्बद्धं प्रभो मां किमुपेक्षसेऽद्य ॥ २५ ॥
भ्रान्त्वा वनं कण्टकरुद्धमार्गं सन्तार्य हर्षाच्छबरीगुहादीन् ॥
द्वारे लुठन्तं स्वयमागतं च स्वामिन्वराकं किमुपेक्षसे माम्
॥ २६ ॥ जानीहि पुत्रं पवनस्य जीनं मन्मानसं चातिबलं
युवानम् ॥ गत्या जयन्तं पवनं प्रभो तत्संपादयैनं स्वपदाब्ज-
भृत्यम् ॥ २७ ॥ व्यामोति विश्वं परितश्च विष्णुरित्याहुरेके
वेदितैकतत्त्वाः ॥ स्वान्ते कदाचिद्व्यपि मे तदा त्वं भोत्स्यसि
किं नैव विभो विभास्वन् ॥ २८ ॥ शून्यामयोध्यां कृतवान्म-

वान्वै नीत्वान्त्यजांश्चापि निजं पदं तान् ॥ आश्चर्यमेतद्धि विभोऽवकाशो न स्यादधन्यस्य यतो विलम्बः ॥ २९ ॥ तीव्रार्तिनिस्तारणकारणस्त्वं द्राक् चेत्समागत्य न मां दयेथाः॥ दीनान्तरार्तिप्रशमप्रतिज्ञा व्यर्था भवेत्तद्भगवन्न युक्तम् ॥ ३० ॥ भामेष्टपूर्त्यै भुवि नाकवृक्षं प्रारोपयो यत्नत एव कृष्ण ॥ त्वद्दर्शनायैव महास्पृहा मद्धुद्धेर्भरस्तत्र च ते प्रभो कः ॥ ३१ ॥ ज्ञात्वा शठं दुष्कृतिनं च दुष्टं चेन्मन्यसे मामवलेपभूमिम् ॥ स्वामिंस्तदा त्वत्करुणामृतस्य पात्रं भवेत्को नु कृपार्द्रबुद्धे ! ॥३२॥ त्वन्नामसंकीर्तनजात्प्रहर्षान्नेत्राम्बुसंसिक्तकपोलदेशः ॥ प्रस्विन्नगात्रश्च विभो भवेयं भावत्करूपस्फुरणात्कदा नु ॥ ३३ ॥ ज्ञात्वापि संसारसुखं विनाशि दुःखानुषक्तं च विपाकदुःखम् ॥ हा हा मनागप्यतितापनाशिन्मच्चित्ततोऽपैति न कृष्ण तृष्णा ॥ ३४ ॥ पापे प्रसक्तं सुकृतेष्वसक्तं मोहान्धकारे पतितं च भीतम् ॥ मामुद्धर द्राक् शरणागतं त्वं विश्वासय स्वीयकरावलम्बात् ॥ ३५ ॥ धात्रः परस्मादवतीर्य मायां धृत्वा च हित्वा प्रणयित्वदैन्यम् ॥ क्रान्त्वा त्रिभिश्चैव पदैस्त्रिलोकीं तत्रे स्वभक्तान्स हरिर्गतिर्मे ॥ ३६ ॥ दुर्भेद्यसांसारिकपाशभेत्री दुर्लङ्घ्यदुःखाम्बुतितारिणी च ॥ दुष्प्रापसारूप्यकरी हरे ! मेऽनाथस्य

चित्तेऽस्तु भवत्सुमूर्तिः ॥ ३७ ॥ रुन्धि द्विषां द्वेषयुताः कुदृष्टी-
र्भिन्ध्यापदश्छिन्धि विभो कुसंगान् ॥ अन्तर्व्यथां पिण्डि च तृ-
ण्डि शत्रून्दन्दग्धि दोषांश्च दयस्व तूर्णम् ॥ ३८॥ शरण्य चेन्न
स्वकृपानुरूपं विधास्यसि त्वं प्रतिभक्तलोकम् ॥ तथापि मा-
मग्रहिलं त्वदर्थे कुधैव के ताडय पादघातैः ॥ ३९ ॥ भवाख्य-
रङ्के भवदीयशासनात्प्रविश्य कार्यं न वरं मया कृतम् ॥ अतः
प्रभो कुद्धतयैव मामितः करेण धृत्वा सहसापसारय ॥ ४० ॥
त्रितापशान्त्यै चरणाग्रभागात्रिमार्गगा ते निरगात्त्रिलोक्याम् ॥
त्रिलोकसंतापहराब्धिशायिन्मच्चित्ततापं न कुतो निहंसि
॥ ४१ ॥ भाग्योदयाच्चेन्मम चित्तभृङ्गः कदापि यायात्तव
पादपद्मे ॥ प्रभो तदेन्द्वर्कविलोचनाशु वामेक्षणेनैव विलोकये-
मम् ॥ ४२ ॥ दुष्पारसंसारसमुद्रतारणे कैवर्तकस्त्वं किल
विश्वविश्रुतः ॥ अज्ञानकल्लोलसहस्रसंकुलां नावं मदीयामपि
कृष्ण ! तारय ॥ ४३ ॥ तृष्णाविहीना अपि यत्पिपासिता
देवर्षिवन्द्या अपि यत्स्तुतौ रताः ॥ सर्वार्चिता श्रीरपि यत्सम-
र्चति तत्पादपद्मं हृदि मेऽस्त्वलं प्रभोः ॥ ४४ ॥ हा हा
हतोऽस्मि करुणाकर कृष्णचन्द्र चिन्ताचिताहुतभुजास्मि स-
जीवदग्धः ॥ सा च त्वरा तव विभो क्व नु नाम याता या

द्रौपदीबहुलभीतिविनाशदक्षा ॥ ४५ ॥ रंकः समग्रमिव शेव-
धिमाप्य कृष्ण त्वत्पादपद्मयुगलं भवतापहर्तृ ॥ स्वप्स्ये कदा
नु परिरभ्य चिरं सुखेन ब्रह्मादिभिः सुरवरैरपि दुर्लभेण ॥ ४६ ॥
तानर्जुनप्रभृतिभक्तगणान्निपुण्यस्नात्वा यमेभ्य इव घोरभयाव-
होभ्यः ॥ हा मत्कृते किमु समेक्षण ! निद्रितोऽसि किं नूचिता
त्वयि विभो नमतामुपेक्षा ॥ ४७ ॥ वासुदेव वसुदेवदेवकी-
बन्धनार्तिहरणेऽभवः सुतः ॥ स्वामिभावमपि मय्यनाथके
नाथ किं न वरितुं प्रसीदसि ॥ ४८ ॥ सेवते कमपि कोऽपि नो
विना वेतनं यदि तथाप्यहं प्रभो ॥ प्रार्थये च भवदंघ्रिसेवनं
तं विनैव तव कात्र नु क्षतिः ॥ ४९ ॥ जयतु भोः प्रभो !
तेऽङ्घ्रिपंकजं हृदयहर्षदं ध्यातृमंगलम् ॥ वसतु मे मनोमन्दिरे
सदा भवतु विश्वतो गाढमोहहृत् ॥ ५० ॥ हृदयहर्षकरैर्मधु-
रस्वरैः प्रियजनान्मदय मुरलीरवैः ॥ दुरितदुःखहरः करुणा-
करो दिशतु मेऽभिमतं परमेश्वरः ॥ ५१ ॥ प्रसीद भगवन्हरे
हर हृदय्यदुःखानि मे निधेहि पदपंकजं शिरसि तापतप्तस्य
मे ॥ कृपाभरितदृष्टिभिः स्नपय भोः कृपाम्भोनिधे तथा कुरु
यथा पुनर्न च भजे भवाध्वश्रमम् ॥ ५२ ॥ मायायाः प्रतिमां
प्रियां जनकजां मायाविमायाहृतां यत्नाद्वारिधिपारमेत्य भगव-

न्प्रत्यानयः प्रेमतः ॥ एतां चापि मदीयमानसगतां मायां मया भक्तितो मायेशोपहृतां कुतो न कृपया गृह्णास्यनुग्रह्य माम् ॥ ५३ ॥ मादृशानामनाथानां त्रिलोकीनाथ भीतिहन् ॥ को गतिस्त्वा विना कृष्ण रक्ष मां करुणानिधे ॥ ५४ ॥ कलङ्क-कुत्साकलितं खलं माऽनाथं नृशंसं कृपणं कृपालो ॥ राम स्वपादाब्जयुगानुरक्तं शास्त्रीयधर्मे च रतं कुरुष्व ॥ ५५ ॥

इति श्रीविष्णुस्तुतिः समाप्ताऽनाथक्षेमाय भवतु ।

श्रीराज्ञीस्तुतिः ।

ॐ संसारसागरमहं तरितुं सुनौकां राज्ञीं नमामि शिरसा शिवसुन्दरीं त्वाम् ॥ सर्वेश्वरीं सकललोकसुखप्रदात्रीं त्वामेव देवि सततं शरणं प्रपद्ये ॥ १ ॥ मातः पयोधरयुगं पिबतु त्वदीयं नागाननर्तुमुखवत्सलपुत्रयुग्मम् ॥ निर्णेजनाम्बुन इह स्पृहयाम्यहं तु त्वत्पादपद्मयुगलस्य भवाग्निशान्त्यै ॥ २ ॥ मातस्त्वदीयपरितोषविशेषलब्धे छत्रे प्रहृष्यतु सदा भगवान्सुरेन्द्रः ॥ पीयूषवर्षणकरात्तव देवि पादच्छत्राद्विना किमपि राज्ञि न नाम याचे ॥ ३ ॥ मोहाटवीविकटसंकटपीडितोऽहं राज्ञि प्रपन्नपरमार्तिहरा त्वमेका ॥ जाज्वल्यतेऽम्ब हृदयार्तिकरो ममान्तः पापाग्निरेशि शमयैनममास्वरूपे ॥ ४ ॥ आरारटीमि करुणं भवतापतप्तः प्रोल्लालपीमि पतितो भवदुःखसिन्धौ ॥ मोमोर्मि राज्ञि लुठितो भवसर्पदष्टस्त्वामन्तरेण शरणं मम कः शरण्ये ॥ ५ ॥ राज्ञि प्रपन्नवरदे सुकृतादपर्णां त्वामाश्रितोऽस्मि सुचिरात्तु महद्विचित्रम् ॥ किं नास्मि भैरवि कृणैस्त्रिविधैर्विमुक्तः पाशैरिवोत्कटविषाक्तभुजङ्गमानाम् ॥ ६ ॥ राज्ञि प्रसीद नतसौख्यकरे मृडानि रुद्राणि रोगहरणे चतुरे प्रसीद ॥ शर्वाणि सर्वजनपापहरे प्रसीद गौरि प्रसीद गुणगौरि शिवे

प्रसीद ॥ ७ ॥ कल्याणि राज्ञि जगदीश्वरि विश्वमातस्त्वाम-
न्तरेण नहि देवि सुखं जनस्य ॥ पुत्रस्य दुःखहरणे सततो-
द्यता द्राक् मातैव हि स्नुतकुचा नु भवत्यवश्यम् ॥ ८ ॥
राज्ञ्यष्टकमिदं पुण्यं यः पठेद्धर्षपूरितः ॥ सोऽत्र द्राक् प्राप्नुया-
त्कामान्परलोके च स्वर्गतिम् ॥ ९ ॥

इति श्रीराज्ञीस्तुतिः समाप्ताऽनाथक्षेमाय भवतु ॥

श्रीराज्ञीस्तोत्रम् ।

ॐ ॐकाररूपेऽखिलवेदसारे वेदान्तविज्ञानचणैः प्रगीते ॥
मूर्ध्ना महाराज्ञि महार्हपीठे वन्दे त्वदीयं चरणारविन्दम् ॥ १ ॥
भूरादिलोके कृतलक्षणेऽजे राज्ञि प्रपन्नार्तिहरे नमस्ते ॥ आक्रन्दमाकर्णय मे शरण्ये भक्तार्तिनाशे ह्यपरः प्रभुः कः ॥ २ ॥
भ्रुवोऽवकाशे रविचन्द्रदीप्तिर्देदीप्यते त्वामनु चित्प्रदीप्तिम् ॥ तमःप्रपञ्चं प्रविलाप्य हार्दं पद्मं ममाबोधय राज्ञि मातः ॥ ३ ॥
स्वःशाखिदर्पं हरतीष्टदानादाशाधिकाद्यत्स्मृतमात्रमेव ॥ मातर्महाराज्ञि तदाननं ते वन्दे शरत्सुन्दरचन्द्ररम्यम् ॥ ४ ॥ तद्वाङ्मनोदूरमचिन्तनीयं रूपं स्वकीयं भवदुःखहारि ॥ पीयूषपीयूषमयूखतुल्यं राज्ञि प्रकाश्यास्मि कदा दयेथाः ॥ ५ ॥ सवितुः शक्तिभूता त्वं सूयसेऽदश्चराचरम् ॥ नमोऽस्तु ते महाराज्ञि पाहि मां शरणागतम् ॥ ६ ॥ वरेण्यं त्वत्पदाभ्यर्चामृतचर्वणमस्तु मे ॥ नमो० ॥ ७ ॥ भर्गो भर्गोऽपि संसारभर्जको यस्तवैव सः ॥ नमो० ॥ ८ ॥ देवस्य त्रिपुरारातेराहोपुरुषिके शिवे ॥ नमो० ॥ ९ ॥ धीमहिम्नापि केनापि यां स्तोतुं न प्रभूयते ॥ नमो० ॥ १० ॥ धियो मे घोरसंसारलंघने सन्तु सञ्जिताः ॥ नमो० ॥ ११ ॥ योऽर्चति त्वां स देवोऽपि मघवादिभिरर्च्यते ॥

नमो० ॥ १२ ॥ नस्ततोष्ट्रवदम्बाहं कर्मपाशैः प्रपीडितः ॥
नमो० ॥ १३ ॥ प्रचोदयात्तवेच्छा मां तवैवाङ्घ्रिनिषेवणे ॥
नमो० ॥ १४ ॥ राज्ञीस्तोत्रमिदं पुण्यं यः पठेद्भक्तिसंयुतः ॥
तस्य सिध्यति सर्वेष्टमचिराद्देवदुर्लभम् ॥ १५ ॥

इति द्वितीयं श्रीराज्ञीस्तोत्रं समाप्तमनाथक्षेमाय भवतु ।

मातुः स्नेहः सर्वपुत्रेषु तुल्यः श्लाघ्याश्लाघ्येष्वम्ब चेत्सत्यमेतत् ॥ दुर्वृत्तस्याप्यात्मजस्यास्ति किं मे त्यागो युक्तस्तर्हि दोषौघहर्त्रि ॥

श्रीशारिकास्तोत्रम् ।

ॐ अष्टादशैरसिगदादियुतैर्भुजैर्या त्रातुं समस्तभुवनानि विपद्भयेभ्यः ॥ जागर्त्यशेषजनदुःखहरा परा सा श्रीशारिका दिशतु मङ्गलसन्ततिं नः ॥ १ ॥ उद्यत्सहस्ररविभास्वरदीप्तिदीप्तां सिंहासनां शशिकलाभरणां त्रिनेत्राम् ॥ यां चिन्तयन्ति बहुभक्तिरसार्द्रचित्ताः श्रीशारिका० ॥ २ ॥ यत्पादयोः सकृदपीह कृतार्चनो ना भक्त्यान्वितो ह्यनुभवत्यमरप्रभुत्वम् ॥ श्रीराजराजसखिसौख्यनिवासभूमिः श्रीशारिका० ॥ ३ ॥ सौदामनीप्रमदमत्तगजेन्द्रकर्णस्थित्या समापि भजते स्थिरतां विभूतिः ॥ यत्पादपङ्कजयुगाश्रयणात्सदा सा श्रीशारिका० ॥ ४ ॥ यत्कीर्तनश्रवणसंमननोत्थपुण्यं शक्नोति नो गणयितुं बहुधाप्यनन्तः ॥ साऽशेषरोगदलनाय धृतौषधीशा श्रीशारिका० ॥ ५ ॥ श्रीमातृकाभिरुपसेवितपादधूल्या प्रद्युम्नपीठसमवस्थितया ययेश्या ॥ कश्मीरदेशजनता परिपाल्यते सा श्रीशारिका० ॥ ६ ॥ यस्याः प्रदक्षिणपरिक्रमणात्सुभक्त्या पापोऽप्यलंह्यभवसागरपारमेति ॥ सा शोकमोहपरितापविपत्तिहर्त्री श्रीशारिका० ॥ ७ ॥ मूलालवालमणिपूरकनाभिपद्महृत्कण्ठशिष्टिमतिवाह्य करन्ध्रमेत्य ॥ या मोदते सह शिवेन सहस्रपत्रे श्रीशारिका० ॥ ८ ॥ यस्या अनाहतनिनादसुधारसेन

ज्ञातः परात्परसुखानुभवात्प्रहृष्टः ॥ जीवंश्च मुक्त इव भाति नरोत्तमः सा श्रीशारिका० ॥ ९ ॥ यद्देहसंगतिरसेन सुधापरार्धधिक्कारकेण विषधारणशक्तियुक्तः ॥ श्रीनीलकण्ठ इति कीर्तिमवाप शंभुः श्रीशारिका दिशतु मंगलसंततिं नः ॥ १० ॥ अमे सुरेशि योगीन्द्रामृतपायनतत्परे ॥ श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ११ ॥ कामे कामितकामानां पूरणे पूर्णतप्रदे ॥ श्रीशारिके० ॥ १२ ॥ चार्वङ्गि कोटिकन्दर्पलावण्ये विश्वमोहिनि ॥ श्रीशारिके० ॥ १३ ॥ टङ्कधारिणि शत्रूणां तिलशो देहखण्डिनि ॥ श्रीशारिके० ॥ १४ ॥ तारे निसर्गगम्भीरभवसागरतारिणि ॥ श्रीशारिके० ॥ १५ ॥ पार्वति त्रिजगन्मातर्हिमवद्वंशपावने ॥ श्रीशारिके० ॥ १६ ॥ यक्षिणीष्टाष्टसिद्धीनां दायिनि देवपूजिते ॥ श्रीशारिके० ॥ १७ ॥ सत्त्वादिशबलेऽनन्तब्रह्माण्डजननीश्वरि ॥ श्रीशारिके० ॥ १८ ॥ कलानिधिकलाकान्तकिरीटकुण्डलोज्वले ॥ श्रीशारिके० ॥ ॥ १९ ॥ श्रीशारिका जगन्माताऽनाथनाथा सुरेश्वरी ॥ प्रीयतां पादयोरेतत्स्तोत्रपुष्पसमर्पणात् ॥ २० ॥

इति श्रीशारिकास्तोत्रं समाप्तम् ।

श्रीज्वालामुखीस्तोत्रम्।

ॐ जाज्वल्यमानवपुषा दशदिग्विभागान्सन्दीपयन्त्यभयपद्मगदावराढ्या ॥ सिंहस्थिता शशिकलाभरणा त्रिनेत्रा ज्वालामुखी हरतु मोहतमः सदा नः ॥ १ ॥ आब्रह्मकीटजननीं महिषीं शिवस्य मुग्धस्मितां प्रलयकोटिरविप्रकाशाम् ॥ ज्वालामुखीं कनककुण्डलशोभितांसां वन्दे पुनः पुनरपीह सहस्रकृत्वः ॥ २ ॥ देदीप्यमानमुकुटद्युतिभिश्च देवैर्दासैरिव द्विगुणितांघ्रिनखप्रदीप्तिम् ॥ ज्वालामुखीं सकलमङ्गलमङ्गलां तामम्बां नतोऽस्म्यखिलदुःखविपत्तिदग्धीम् ॥ ३ ॥ क्षित्यब्धुताँशपवनाम्बरसूर्यचन्द्रयष्ट्राख्यमूर्तिममलानपि पावयन्तीम् ॥ ज्वालामुखीं प्रणतकल्पलतां शिवस्य साम्राज्यशक्तिमतुलां महतीं नमामि ॥ ४ ॥ नौमीश्वरीं त्रिजगतोऽभयदानशौण्डां ज्वालामहार्यभवजालहरां नमामि ॥ मोहान्धकारहरणे विमलेन्दुकान्तिं देवीं सदा भगवतीं मनसा स्मरामि ॥ ५ ॥ दुष्कर्मवायुभिरितस्ततः एव दीप्तैः पापज्वलज्ज्वलनजातशिखाकलापैः ॥ दग्धं च जीवयतु मां परितो लुठन्तं देवी दयार्द्रहृदयामृतपूर्णदृष्ट्या ॥ ६ ॥ ज्वालामुखी ज्वलदनल्पलयाग्निकोटिरोचिष्मती रविशशिप्रतिभानकर्त्री ॥ भक्तस्य भर्गवपुषा भवभर्जनाय भूयात्सदाभ्युद-

पदानवद्यमुख्या ॥ ७ ॥ त्वं चौषधीशमुकुटाऽहमसाध्य-
रोगस्त्वं चित्प्रदीपिरहमत्र भवांध्यमग्नः ॥ त्वं चाम्ब ! कल्प-
तरुरेवमहं च भिक्षुर्ज्वालामुखि प्रकुरु देवि यथोचितं मे ॥ ८ ॥
यद्ध्यानकेसरिसमाक्रमणोत्थभीतेर्मर्मव्यथाजनकदुःखशतानि
सद्यः ॥ गोमायवन्ति परितो भृशकान्दिशीकानस्मांश्च पालयतु
सैव भवाब्धिदुःखात् ॥ ९ ॥ ज्वालामुखि क्षणमपीह विलम्ब-
मम्ब नार्तो ह्यनर्थपतितः सहते विपन्नः ॥ हस्तस्थितामृतकम-
ण्डलुवारिणैव मां मूर्च्छितं झटिति जीवय तापतप्तम् ॥ १० ॥
बाह्यान्ध्यनाशनविधौ रविचन्द्रवह्निज्योतींषि देवि दययाऽज-
नयः पुरा त्वम् ॥ एतत्तु रूपमखिलान्तरमोहरात्रिध्वान्ता-
न्तकारि तव यत्स्फुरतादतोऽन्तः ॥ ११ ॥ मन्ये त्रिधा-
मनयने नयनत्रयं ते भक्तार्तिनाशननिमित्तविलोकनाय ॥
मातः परं यदपि देवि तथाप्यऽधन्यस्त्वद्दृष्टिपातरहितोस्म्यहहा
हतोऽस्मि ॥ १२ ॥ सत्यं ब्रवीमि शृणु चित्त मदान्ध मूर्ख मा
गाः कदापि विषयान्विषमान्विषाक्तान् ॥ ईशीमपारकरुणां
भवभीतिभेत्रीमम्बां भजस्व सततं परसौख्यदात्रीम् ॥ १३ ॥
त्वं मे महेशि जननी मरमार्तिहर्त्री त्वं मे पिता हिततमस्त्वमह
तुर्बुधुः । त्वं मे भवाब्धितरणे दृढनौस्त्वमेव दुःखामयाधिह

चतुरश्च वैद्यः ॥ १४ ॥ ज्वालां जगज्जननसंहरणस्थितीनां हेतुं गतिं मुषितलज्जितदुःखितानाम् ॥ उन्मोचनां च भवबंधनदुर्गतीनां त्वां नौमि नौमि शरणं शरणागतानाम् ॥ १५ ॥ ज्वालामुखीस्तवमिमं शृणुयात्पठेद्वा यः श्रद्धया परमया बहुभक्तियुक्तः ॥ भूयात्स दग्धबहुजन्मशतार्जितोऽघोऽनाथोप्यनेकजननाथितराज्यसंपत् ॥ १६ ॥

इति श्रीज्वालामुखीस्तोत्रं समाप्तम् ।

TVR.